योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः २०२

द्व्यधिकद्विशततमः सर्गः २०२

श्रीवाल्मीकिरुवाच ।

एतच्छ्रुत्वा वसिष्ठस्य वचः संसदि पार्थिवाः ।

सिक्ता इवामृतापूरैरन्तःशीतलतां ययुः ।। १

रामः कमलपत्राक्षो रराज वदनेन्दुना ।

क्षीरोद इव संपूर्णः सुधापूरेण चारुणा ।। २

वामदेवादयः सर्वे तत्त्वज्ञानविशारदाः ।

अहो भगवता ज्ञानमुक्तमित्यूचुरादरात् ।। ३

शान्तान्तःकरणो राजा मुदा दशरथो बभौ ।

तुष्ट्यैव संप्रहृष्टाङ्गो नवां द्युतिमुपागतः ।। ४

ज्ञातज्ञेयेषु बहुषु साधुवादकथास्वथ ।

उवाच गलिताज्ञानो रामो वाक्यमिदं पुनः ।। ५

श्रीराम उवाच ।

भगवन्भूतभव्येश त्वयास्माकमलं मलम् ।

संप्रमृष्टमिदं हेम्नः श्यामत्वमिव वह्निना ।। ५

अभूम वयमात्मीयकायमात्रदृशः पुरा ।

प्रभो संप्रति संपन्ना विष्वग्विश्वावलोकिनः ।। ७

स्थितोऽस्मि सर्वसंपूर्णः संपन्नोऽस्मि निरामयः ।

जातोऽस्मि विगताशङ्को बुधो जागर्मि संप्रति ।। ८

आनन्दितोऽस्म्यखेदाय सुखितोस्मि चिराय च ।

स्थितोऽनस्तमयायैव शाश्वतार्थोदयो मम ।। ९

अहो बत पवित्रेण शीतेन ज्ञानवारिणा ।

त्वया सिक्तोस्मि हृष्यामि पद्मवद्धृदये स्वयम् ।। १०

इयमद्य मया लब्धा पदवी त्वत्प्रसादतः ।

यस्यां स्थितस्य मे सर्वममृतत्वं गतं जगत् ।। ११

अन्तःप्रसन्नमतिरस्तसमस्तशोकः

शोभां गतोऽहममलाशय एव शान्त्या ।

आनन्दमात्मनि गतः स्वयमात्मनैव

नैर्मल्यमभ्युपगतोऽस्मि नमोस्तु मह्यम् ।। १२

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० नि० उत्तरार्धे आत्मविश्रामाङ्गीकरणं नाम द्व्यधिकद्विशततमः सर्गः ।। २०२ ।।